# संस्कृत-वार्ता:

**दिनाङ्क :-23.07.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**वित्त-सङ्कल्पना-सत्रम्**

वित्तमन्त्री निर्मला सीतारामन् अद्य: प्रात: एकादशवादने चतुर्विंशत्युत्तर-पंचविंशत्युत्तर-द्वि-सहस्र-तमवर्षीयम् केन्द्रीय वित्त-सङ्कल्पना-पत्रं प्रस्तौष्यति। नरेन्द्र मोदिन: सर्वकारस्य तृतीय कार्यकालस्य एतत् प्रथमं आयव्यय-विवरणं भविष्यति। ह्य: उभयो: सदनयो: त्रयोविंशत्युत्तर-चतुर्विंशत्युत्तर-द्वि-सहस्र-तमवर्षीयम् आर्थिक-सर्वेक्षणं प्रास्तौत्। आर्थिक-सर्वेक्षणे वास्तविक-सकल-गृहोत्पादस्य वृद्धे: परिमिति: प्रतिशतं सार्ध षट्-मितात् सप्त-मिताभ्यन्तरे स्थास्यति इति अनुमीयते। रिजर्व बैंकेनापि प्रवर्तमान-वित्त-वर्षे मुद्रास्फीतिः प्रतिशतं दशमलवोत्तर-पञ्चाधिक-चतुर्मिता आशास्यते। आर्थिकसर्वेक्षणे प्रोक्तमस्ति यत् उत्पादानां, व्यापाराणां, सेवानां च निर्याते वृद्धिः सम्भाव्यते। सर्वेक्षणस्यानुसारं वस्तुसेवाकरस्य ऋणशोधनस्य च वैधानिकप्रावधानेषु आधारिक-परिष्काराः अपि परिपक्वाः अजायन्त। येन तेषां वाञ्छित-परिणामाः प्राप्यमाणाः सन्ति। अपरत्र च महार्घता-विषये रिजर्वबैङ्केन आगामिनि वित्तवर्षे मुद्रास्फीतेः मुख्यपरिमितिः प्रतिशतं सार्धचतुःमितं अथ च षड्विंशत्युतर-द्विसहस्रतमे वित्तवर्षे प्रतिशतं दशमलवोत्तर-एकाधिकचतुर्मितं भविष्यति इति आशास्यते। अन्ताराष्ट्रिय-मुद्राकोषेण भारताय अस्मिन् वर्षे मुद्रास्फीतिः प्रतिशतं दशमलवोत्तर-षडधिक-चतुर्मितम्, अथ च आगामिनि वित्तवर्षे प्रतिशतं दशमलवोत्तर-द्व्यधिक-चतुर्मितम् अनुमितमस्ति। चतुर्विंशत्युतर-द्वि-सहस्र-तमवर्षीय-सकल-गृहोत्पादानां वास्तिविकी परिमितिः विंशत्युत्तर-द्वि-सहस्र-तमवर्षस्य तुलनायां प्रतिशतं विंशतिमितं अधिकम् अवर्तत। अस्मिन् वर्षेपि वृद्धिपरिमितिः सुदृढा भविष्यति इति सम्भाव्यते। सर्वेक्षणानुसारं जीविकाहीनतायाः बहुपक्षीय-निर्धनतायाः च क्षेत्रेषु नैयून्यं, श्रमबलसहभागितासु च समेधनं जातम् अस्ति, येन विकासस्य स्थितिः समावेशितापूर्णा अवर्तत। सर्वेक्षणे प्रोक्तमस्ति यत् सकल-गृहोत्पाद-परिमितौ अस्मिन् वर्षे प्रतिशतं दशमलवोत्तर-द्वयाधिक-अष्टमिता वृद्धिः जाता अस्ति। अथ च एतद्धि निरन्तरं प्रतिशतं सप्ततोपि अधिकं समेधनं जातम् अस्ति।

**प्रधानमन्त्री वित्तसङ्कल्पनापत्रकम् :**

प्रधानमन्त्री श्री नरेन्द्रमोदी प्रोक्तवान् यत् अद्य: प्रस्तोष्यमाणं वित्त-सङ्कल्पना-पत्रकम् अमृतकालस्य महत्त्वपूर्णम् आय-व्यय-विवरणं भविष्यति । संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं संसदः बहिः वार्ताहरैः समं सम्भाषमाणः श्रीमोदी उक्तवान् यत् लोकसभानिर्वाचनेषु देशस्य जनतया निर्णयः प्रदत्तः अस्ति यत् सर्वैः राजनैतिकदलैः सम्भूय आगामि-पञ्चवर्षपर्यन्तं देशस्य कृते कार्यम् आचरणीयम् । श्रीमोदिना प्रोक्तं यत् अहं देशवासिभ्यः प्रत्याभूतिं ददामि यद् वयं पूर्वविहितानां प्रतिश्रुतीनां धरातले क्रियान्वयनस्य लक्ष्यं निध्याय अग्रे वर्धामहे । एतद् वित्तसंकल्पनापत्रकं पञ्चवर्षेभ्यः सर्वकारस्य कार्याणां दशां दिशां च विनिश्चेष्यति । अथ च एषा सङ्कल्पना विकसित-भारतस्य स्वप्नस्य सम्पूर्तये आधारभूता वर्तते। अस्मिन् अवसरे श्रीमोदिना कथितरूपेण नकारात्मक-राजनीति-विधानपराणां विपक्षि-दलानाम् कटूवालोचनां कुर्वता प्रोदितं यत् तैः निज-विफलताः निगूढयितुं संसदः समयोपि विनष्टीकृत: ।

**शेखावत:/ शास्त्रीयभाषा**

सांस्कृतिकपर्यटनमन्त्री गजेन्द्रसिंह शेखावतः ह्यः अवदत् यत् षट् भारतीयभाषाभ्यः तमिल, संस्कृत, कन्नड, तेलुगु, मलयालम्, ओडिया च शास्त्रीयभाषायाः रूपेण मान्यता प्रदत्ता अस्ति। लोकसभायाम् एकस्मिन् लिखिते उत्तरे मन्त्री उक्तवान् यत् शास्त्रीयभाषां समेत्य सर्वासु भारतीयभाषासु प्रचारार्थं सर्वकारः प्रतिबद्धः

**।।इति वार्ता:।।**